मलहरिश्च सालङ्गनाटमङ्गलकैशिकौ ॥ १८ ॥

ललिताद्यः पञ्चमो मारुव. शुद्धक्रियस्तथा ।
मेघरञ्जी च पाडी च पूर्णपञ्चम एव च ॥ १९ ॥

सुरसिन्धुर्देश्यगोलस्तथा गौरीसमाह्वय ।
सिन्धुरामक्रियो गोलिपन्तुः सौराष्ट्रनामकः ॥ २० ॥

आर्द्रदेशिकरागश्च तथा गूर्जरिनामकः ।
तथा कन्नडबङ्गालो मार्गदेशिक एव च ।
परजुः पूर्विरागश्च वसन्तश्चेति नामतः ॥ २१ ॥

१६. षोडशाच्चक्रवाकाख्यान्मेलाद्रागास्त्रयः स्मृता. ।
कलावती तथा वेगवाहिन्यथ भुजङ्गिनी ॥ २२ ॥

१७. सूर्यकान्तात्सप्तदशात्सुप्रदीपः सभैरवः ॥ २३ ॥

१८. हाटकाम्बरिमेलादष्टादशात्तु त्रयो मताः ।
शुद्धमालविसिहेलकल्लोला इति तान्विदु ॥ २४ ॥

१९. एकोनविंशमेलात्तु झङ्कारध्वनिनामकात् ।
झंकारभ्रमरा पूर्णललिता चेत्युभौ स्मृतौ ॥ २५ ॥

२०. नरभैरविनो विंशाच्चतुर्विंशतिरीरिताः ।
भैरवी रीतिगोलश्च जयन्तश्रीस्तथैव च ॥ २६ ॥

सनारायणदेशादी हिन्दोलाभेरिनामकौ ।
उदयरविचन्द्रिकाऽऽनन्दभैरविरागकः ॥ २७ ॥

तथा देवक्रियश्चेन्दुघण्टारवसमाह्वयः ।
वसन्तवराली नागगान्धारी माञ्जिरेव च ॥ २८ ॥

शुद्धदेशी मार्गहिन्दोलको नायकिनामभाक् ।
कनकादिवसन्तश्च पूर्णषड्जस्तथैव च ॥ २९ ॥

गोपिकादिर्वसन्तश्च चापघण्टारवस्तथा ।
सहिन्दोलवसन्तः सारङ्गकाप्यभिधस्तथा ।
अमृताद्या वाहिनी च जिङ्गलाराग इति क्रमात् ॥ ३० ॥

२१. पञ्चापि कीरवाण्याख्यादेकविंशात्तु जज्ञिरे ।
जयश्रीकिरणावल्यौ माधवीराग एव च ।
कल्याणाख्यश्च कर्णाटदेवगान्धारिरित्यमी ॥ ३१ ॥

२२. द्वाविंशाच्च खरहरप्रियमेलात्तु जज्ञिरे ।
रागास्त्रिंशत्तथा श्र्याख्यो मालवश्रीस्ततः परम् ॥ ३२ ॥

रागः कन्नडगौलाख्यो मध्यमावतिरेव च ।
फलमञ्जरिसंज्ञश्च मणिरङ्गुस्तथैव च ॥ ३३ ॥

जयन्तसेनासैन्धव्यौ शुद्धधन्यासिकेति च ।
शुद्धभैरविकाभोग्यौ तथा सालगभैरवी ॥ ३४ ॥

जयनारायणी चैव मनोहरिसमाह्वय ।
तथा मारुवधन्यासी कलानिधिरतः परम् ॥ ३५ ॥

पञ्चमः शुद्धबङ्गालो मञ्जर्याख्य उशेनिका ।
कापिः श्रीरञ्जनी चैव शुद्धवेलावलिस्तथा ॥ ३६ ॥

दर्बारुर्मन्दमारिश्च सिद्धमेनस्तथैव च ।
मल्लारुश्च मुखारी च तथा देवमनोहरी ।
बालघोषीति च ख्यातास्त एते च यथाक्रमम् ॥ ३७ ॥

२३. गौरीमनोहरीमेलाद्रागो वेलावलिः स्मृतः ।
२४. चतुर्विंशात्तु वरुणप्रियाद्वीरवसन्तकः ॥ ३८ ॥

२५. माररञ्जनिमेलात्तु पञ्चविंशाच्छरद्द्युतिः ।
ततो देशमुखारीति केसरीति त्रयं विदुः ॥ ३९ ॥

२६. षड्विंशाच्चारुकेशीतो जातामाहुस्तरङ्गिणीम् ॥ ४० ॥

२७. सरसाङ्ग्याः सप्तविंशमेलात्स्युः सुरसेनिका ।
दिव्यपञ्चमरागश्च कमलाद्यमनोहरी ॥ ४१ ॥

२८. अष्टाविंशाच्चतुस्त्रिंशद्धरिकाम्भोजिमेलकात् ।
काम्भोजी केदारगौलस्ततो नारायणी तथा ॥ ४२ ॥

नारायणाद्यगौलो मालवी च्छायातरङ्गिणी ।
बलहंसश्च नटनारायणी मोहनस्तथा ॥ ४३ ॥

कापिनारणिजञ्झूट्यौ शहनेशमनोहरी ।
प्रतापाद्यवराली च कुन्तलाद्यवरालिका ॥ ४४ ॥

सरस्वतीमनोहरी तथा नीलाम्बरी ततः ।
सामान्धालिद्विजावन्तीमत्तकोकिलनामकाः ॥ ४५ ॥

बङ्गालरागपञ्जरौ तथैव रविचन्द्रिका ।
कोकिलध्वनिनामा नवरसकन्नडाह्वयः ॥ ४६ ॥

स्वरावलिश्च नागस्वरावलिर्बहुदारिका ।
काम्भोजिर्यदुकुलाङ्का सुरटिश्च कमासु च ।
ततो नाटकुरञ्जी च देशाक्षी तदनन्तरम् ॥ ४७ ॥

२९. एकोनत्रिंशकाद्धीरशंकराभरणादिमे ।
कुरञ्जिरागः केदारश्चाहिरीनाट एव च ॥ ४८ ॥

माहुरिः कोलाहलश्च जनरञ्जनिका तथा ।
व्यागुहंसध्वनिश्चैव पूर्णचन्द्रिकया सह ॥ ४९ ॥

देवगान्धार्यारभिश्च नवरोजुसमाह्वयः ।
अठाणाख्यो जलाबुः कन्नडो बिलहरिस्तथा ॥ ५० ॥

शुद्धसावेरिका नागध्वनिः शुद्धवसन्तकः ।
बेगडाख्यो वर्धनी च सिन्धुरागस्तथैव च ॥ ५१ ॥

पूवगौलो गौडमल्लार्वाख्यश्चेति यथाक्रमम् ।
३०. नागानन्दिनिमेलात्तु त्रिंशात्सामन्त एककः ॥ ५२ ॥

३१. यागप्रियाख्यमेलादेकत्रिंशात्कलहंसकः ।
३२. रागचूडामणिर्मेलाद्द्वात्रिंशाद्रागवर्धनेः ॥ ५३ ॥

३३. मेलाद्वाङ्गेयभूषण्या गङ्गातरङ्गिणीजनिः ॥ ५४ ॥

३४. छायानाटश्चतुस्त्रिंशाद्रागधीश्वरितोऽजनि ।
साकं तु भानुमञ्जर्या शारदाभरणेन च ॥ ५५ ॥

३५. पञ्चत्रिंशाच्छूलिनीतो जातोऽसौ गानवारिधिः ।
३६. षट्त्रिंशाच्चलनाटात्तु नाटरागस्य संभवः ॥ ५६ ॥

३७. सालवीभोगसावेर्यौ सप्तत्रिंशात्तु सालगात् ।
३८. जगन्मोहनरागः स्यादष्टात्रिंशाज्जलार्णवात् ॥ ५७ ॥

३९. मेलाज्झालवराल्याख्यान्नवत्रिंशादुभौ स्मृतौ ।
पञ्चमः कोकिलाद्यश्च तथा भूपालपञ्चमः ॥ ५८ ॥

४०. मेलाच्च नवनीताख्याच्चत्वारिंशान्नभोमणिः ॥ ५९ ॥

४१. पावनीतश्चैकचत्वारिंशाद्रागावुभौ स्मृतौ ।
प्रभावली च चन्द्रज्योतिश्च रागौ हि तौ क्रमात् ॥ ६० ॥

४२. रघुप्रियाख्यान्मेलाद्द्विचत्वारिंशाज्जनिं गताः ।
रघुलीला च गन्धर्वो गोपतिश्चेति विश्रुताः ॥ ६१ ॥

४३. त्रिचत्वारिंशमेलाच्च गवाम्भोधेरुभौ स्मृतौ ।
गीर्वाणीराग एकः स्यादन्यः कलवसन्तकः ॥ ६२ ॥

४४. चतुश्चत्वारिंशमेलाद्भवानीसरसीरुहौ ।

४५. पञ्चचत्वारिंशमेलाच्छुभा पन्तुवरालिका ॥ ६३ ॥

४६. मेलात्षड्विधमार्गिण्याः षट्चत्वारिंशकादुभौ ।
तीव्रवाहिन्याख्य एकः श्रीकण्ठीनामकः परः ॥ ६४ ॥

४७. सप्तचत्वारिंशमेलात्सुवर्णाङ्गीसमाह्वयात् ।
सौवीररतिकाभीरुरागा एते तु जज्ञिरे ॥ ६५ ॥

४८. अष्टचत्वारिंशमेलाद्दिव्यमण्यभिधात्क्रमात् ।
जीवन्तिनी शुद्धगान्धार्याम्रपञ्चमरागकः ।
आदिपञ्चमरागश्चेत्येते चत्वार ईरिताः ॥ ६६ ॥

४९. नवचत्वारिंशकात्तु धवलाम्बरिनामकात् ।
धवलाङ्गी तथा भिन्नहेरालीराग एव च ।
तथैव देवगिर्याख्यो धर्माणी च चतुर्थिका ॥ ६७ ॥

५०. नामनारायणीमेलात्पञ्चाशाज्जनिमागताः ।
निर्मदो मन्दारिका प्रतापश्चेति त्रयस्त्विमे ॥ ६८ ॥

५१. कामवर्धनिमेलादेकपञ्चाशाज्जनिं गताः ।
रामक्रिया दीपकश्च तथा भोगवसन्तकः ॥ ६९ ॥

५२. रामप्रियाद्द्विपञ्चाशाज्जाता राममनोहरी ॥ ७० ॥

५३. त्रयःपञ्चाशमेलात्तु गमनश्रमनामकात् ।
गमनक्रियरागः सत्पूर्वकल्याणिरागकः ॥ ७१ ॥

५४. विश्वंभर्यास्तु वैशाखश्चतुःपञ्चाशमेलकात् ॥ ७२ ॥

५५. मेलात्तु पञ्चपञ्चाशाच्छामलाङ्गीसमाह्वयात् ।
शामला देशावलिश्चेत्येतौ रागौ प्रकीर्तितौ ॥ ७३ ॥

५६. षण्मुखप्रियनाम्नः षट्पञ्चाशान्मेलकाद्विदु ।
त्रिमूर्ति च वसुकरी भाषणी गरिगद्यकम् ॥ ७४ ॥

५७. सिंहेन्द्रमध्यमात्सप्तपञ्चाशाज्जनिता इमे ।
सीमन्ती माधवमनोहरिका शेषनादकः ।
घण्टाणरागः सर्वाङ्गी शुद्धरागस्तथैव च ॥ ७५ ॥

५८. अष्टपञ्चाशकान्मेलाद्रागः सिंहरवः स्मृतः ।

५९. मेलात्तु नवपञ्चाशाद्धोम्यरञ्जनिके स्मृते ॥ ७६ ॥

६०. मेलात्षष्टितमान्नीतिमत्याख्याच्च निषादकः ।
हंसनादाभिधो गौरिक्रियः कैकवशीति च ॥ ७७ ॥

६१. एकषष्टितमान्मेलात्कान्तामण्याह्वयात्क्रमात् ।
रागौ द्वौ प्रथितौ नाम्ना कुन्तलः श्रुतिरञ्जनी ॥ ७८

६२. द्विषष्टितममेलात्तु रत्नभानुरजायत ।
६३. गोत्रारिस्तु लताङ्गीतस्त्रिषष्टितममेलकात् ॥ ७९ ॥

६४. षड्वाचस्पतिमेलात्तु चतु षष्टितमादिमे ।
बर्बरश्चोत्तरी चैव भूषावलिसमाह्वयः ।
सारङ्गाख्यः सरस्वत्यभिधो भोगीश्वरीति च ॥ ८० ॥

६५. पञ्चषष्टितमान्मेलान्मेचकल्याणिनामकात् ।
जातौ कौमोदयमुनाकल्याणीनामकावुभौ ॥ ८१ ॥

६६. षट्षष्टितममेलाच्चित्राम्बर्याश्चतुरङ्गिणी ।
६७. सुचरित्रात्सप्तषष्टितमात्सत्यवतीजनि ॥ ८२ ॥

६८. जोतिष्मती तु जोतिःस्वरूपिण्याः समजायत ।
६९. नवषष्टितमान्मेलाद्धौतपञ्चम उद्ययौ ॥ ८३ ॥

७०. मेलात्तु सप्ततितमान्नासिकाभूषणीरितात् ।
नासामण्यभिधो राग एकस्तु समजायत ॥ ८४ ॥

७१. कुसुमावलिरागस्तु कोसलादेकसप्ततात् ॥ ८५ ॥

७२. द्वासप्ततितमान्मेलाद्रसिकप्रियनामकात् ।
रसमञ्जरिरागः स्यादिति रागसमुद्भवः ॥ ८६ ॥

अथ तत्तन्मेलजानां रागाणां लक्षणानि—

१. कनकाङ्गीसुमेलाच्च कनकाम्बरिनामकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे वक्रसंपूर्णमवरोहे समग्रकम् ।
सगरीगामपाधानी धसनीधापमागरी ॥ १ ॥

कनकाङ्गीसुमेलाच्च जाता शुद्धमुखारिका ।
षड्जन्यासांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे तु सुसंपूर्णमवरोहे पवर्जितम् ।
सरिगामापधानीसा निधमागारिसानिसा ॥ २ ॥

२. रत्नाङ्गीमेलसंजाता फेनद्युतिरितीरिता ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
गवर्ज्यं वक्रमारोहेऽप्यवरोहे पवर्जितम् ।
सरिमापाधपानीसा ससनीधामगारिसा ॥ १ ॥

रत्नाङ्गीमेलसंजातः श्रीमणीराग एव च ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे मनिवर्ज्यं चाप्यवरोहे मवर्जितम् ।
सरिगापाधसासानी धपगारीसनीधसा ॥ २ ॥

रत्नाङ्गीमेलसंजातो रागो घण्टारवस्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

धवर्ज्यंवक्रमारोहे त्ववरोहे समग्रकम् ।
सरीसगमपानीसा सनींधपमगारिसा ॥ ३ ॥

३. गानमूर्तिसुमेलाच्च जाता सामवरालिका ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे तु गवर्ज्यं चाप्यवरोहे समग्रकम् ।
सरिमापाधनीसानी धपमागारिसानिसा ॥ १ ॥

गानमूर्तिसुमेलाच्च जातो वै भिन्नपञ्चमः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे तु रिवर्ज्यं चाप्यवरोहे समग्रकम् ।
सगमापाधनीसानी धपमागारिसानिसा ॥ २ ॥

४. वनस्पतिसुमेलाच्च जाता भानुमतीति सा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे धनिवर्ज्यं चाप्यवरोहे समग्रकम् ।
सरिगारिमपासासा सनिधापामगारिसा ॥ १ ॥

वनस्पतिसुमेलाच्च रसालीरागसंभवः ।
रिन्यासं रिषभांशं च रिषभग्रहमुच्यते ।
आरोहे तु गवर्ज्यं च गनिवर्ज्यावरोहकम् ।
सरिमापाधनीसानी सधपामारिसानिसा ॥ २ ॥

५. मानवत्यधिकाराच्च मनोरञ्जनिनामकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे तु गवर्ज्यं च पूर्णवक्रावरोहकम् ।
सरिमापाधनीसानी सनिधापाधमागरी ॥ १ ॥

मानवत्याख्यमेलाच्च घनश्यामलनामकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे रिनिवर्ज्यं चाप्यवरोहे समग्रकम् ।
सगमापाधसासानी धपमागारिसाधसा ॥ २ ॥

६. तानरूपिसुमेलाच्च तनुकीर्त्यभिधोऽजनि ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे गधवर्ज्यं च वक्रपूर्णावरोहकम् ।
सरिमापानिसासानी धनिपामागमारिसा ॥ १ ॥

तानरूपिसुमेलाच्च जाता शृङ्गारिणी किल ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽधनि वक्रं चाप्यवरोहे समग्रकम् ।
सगरीपमपासानी धपमागरिसापसा ॥ २ ॥

७. सेनापत्याख्यमेलात्तु रागः सेनाग्रणीस्तथा
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

पवर्ज्यवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सरिगारिमगामाधा निसनीधपमागरी ॥ १ ॥

सेनापत्याख्यमेलात्तु रागो भोगिसमाह्वयः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
रिवर्ज्यवक्रमारोहेऽप्यवरोहे रिवर्जितम् ।
सगमापधनीधासा निधापमगसाधसा ॥ २ ॥

सेनापत्याख्यमेलात्तु जातश्चिन्तामणिस्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
समग्रवक्रमारोहेऽप्यवरोहे तथैव च ।
सरिगामसमापाधा निसधानिपमागरी ॥ ३ ॥

८. हनुमत्तोडिमेलाच्च तोडीराग उदाहृतः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च पवर्ज्य षाडवं तथा ।
सरिगामधनीसासा सनिधामगरीससा ॥ १ ॥

हनुमत्तोडिमेलाच्च जातो भूपालनामकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च मनिवर्ज्यं तथौडुवम् ।
सरिगापापधाधासा सधपागागरीससा ॥ २ ॥

हनुमत्तोडिमेलाच्च जाता नागवरालिका ।
संन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे पूर्णवक्रं चाप्यवरोहे समग्रकम् ।
निसागरिगमापाधा पमागरिसनीनिसा ॥ ३ ॥

हनुमत्तोडिमेलाच्च शुद्धसामन्तनामकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे गनिवर्ज्यं चाप्यवरोहे निवर्जितम् ।
धसरीरिमपापाधा पममागगरीरिसा ॥ ४ ॥

हनुमत्तोडिमेलाच्च जाताऽसावेरिनामिका ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे गनिवर्ज्यं चाप्यवरोहे समग्रकम् ।
सरिमापाधसासानी धपमागारिसारिसा ॥ ५ ॥

हनुमत्तोडिमेलाच्च स्यात्पुंनागवरालिका ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च पूर्णो मध्यमरागकः ।
निसरीगामपाधानी निधपामागरीसनी ॥ ६ ॥

हनुमत्तोडिमेलाच्च शुद्धसीमन्तिरागकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

आरोहेऽप्यवरोहे च निवर्ज्यं षाडवं तथा ।
सरिगामापधाधासा सधपामागरीरिसा ॥ ७ ॥

हनुमत्तोडिमेलात्स्याद्राग आहिरिनामकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
संपूर्णं वक्रमारोहेऽप्यवरोहे समग्रकम् ।
सरिसागमपाधानी सनिधापमगारिसा ॥ ८ ॥

हनुमत्तोडिमेलाच्च जातो धन्यासिनामकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे रिधवर्ज्यं चाप्यवरोहे समग्रकम् ।
सगमापनिसासानी धपमागरिसानिसा ॥ ९ ॥

९. धेनुकामेलसंजातो भिन्नषड्जकनामकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
धवर्ज्यवक्रमारोहेऽप्यवरोहे निवर्जितम् ।
सरिगारिपमापानी सधपामगरीसरी ॥ १ ॥

धेनुकामेलजः शोकवरालीराग एव च ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे रिपवर्ज्यं चाप्यवरोहे समग्रकम् ।
सससागगमामानी निधपामागरीरिसा ॥ २ ॥

धेनुकामेलसंजातष्टक्कराग इतीरितः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
रिवर्ज्यवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सगपामाधधानीसा सनिधापामगारिसा ॥ ३ ॥

१०. नाटकप्रियमेलाच्च जातो दीपरनामकः ।
सन्यासं सांशक चैव सषड्जग्रहमुच्यते ।
आरोहे चाथ सपूर्ण पूर्णवक्रावरोहकम् ।
सरिगामपधानीसा निधनीपमगारिसा ॥ १ ॥

नाटकप्रियमेलाच्च नटाभरणसञ्ज्ञकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च सपूर्ण वक्रमेव च ।
सरिगामपधापानी सनिधापमगामरी ॥ २ ॥

११. कोकिलप्रियमेलाच्च कोकिलारवनामकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे वक्रसंपूर्णमवरोहे समग्रकम् ।
सरिगारिमपाधानी सनिधापमगारिसा ॥ १ ॥

कोकिलप्रियमेलाच्च संजाता वर्धनी तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

आरोहेऽप्यवरोहे च रिवर्ज्यं वक्रमेव च ॥
सगमापामपाधानी सनिपाधपमागसा ॥ २ ॥

१२. रूपवत्याख्यमेलात्तु रागो रौप्यनगोऽजनि ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे रिगवर्ज्यं च वक्रपूर्णावरोहकम् ।
समपापाधनीसानी धनिपामागरीससा ॥ १ ॥

१३. गायकप्रियमेलाच्च रागो हेज्जिज्जिनामकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे तु निवर्ज्यं चाप्यवरोहे ममग्रकम् ।
सरिगामपधाधासा सनिधापमगारिसा ॥ १ ॥

गायकप्रियमेलाच्च जातो मेघ इति स्मृतः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
गवर्ज्यवक्रमारोहेऽप्यवरोहे गवर्जितम् ।
सरिमापानिधापासा सनिधापामरीससा ॥ २ ॥

गायकप्रियमेलाच्च जुजावलिरुदाहृता ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च रिवर्ज्यं वक्रमेव च ।
समगामपधानीसा सधनीधपमागसा ॥ ३ ॥

गायकप्रियमेलाच्च कलकण्ठीसुनामकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च गवर्ज्यं षाडवं तथा ।
सरिमापाधनीसासा सनिधापमरीससा ॥ ४ ॥

गायकप्रियमेलाच्च रागः कलगडसंज्ञकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च मवर्ज्यं षाडवं तथा ।
सरिगापापधानीसा सनिधापापगारिसा ॥ ५ ॥

१४. वकुलाभरणान्मेलाज्जातो रागवसन्तकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
गवर्ज्यवक्रमारोहे पूर्णवक्रावरोहकम् ।
सरिमापनिधासासा निधमापमगारिसा ॥ १ ॥

वकुलाभरणाज्जातो रागो वासन्तभैरवी ।
धन्यासं धांशकं चैव धैवतग्रहमुच्यते ।
आरोहे तु पवर्ज्यं च पूर्णवक्रावरोहकम् ।
सरिगामधनीसासा निधमापमगारिसा ॥ २ ॥

वकुलाभरणान्मेलात्संजातः सोमनामकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

गवर्ज्यवक्रमारोहेऽप्यवरोहे पवर्जितम् ।
सरिमापमधानीसा सनिधामगरीससा ॥ ३ ॥

वकुलाभरणान्मेलाद्वसन्ताद्या मुखारिका ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
रिवर्ज्यवक्रमारोहेऽप्यवरोहे समग्रकम् ।
समगामपधानीसा सनिधापमगारिसा ॥ ४ ॥

१५. मायामालवगौलाच्च मेलात्सावेरिनामकः ।
मन्यासं मांशकं चैव मध्यमग्रहमुच्यते ।
आरोहे गनिवर्ज्यं चाप्यवरोहे समग्रकम् ।
सरिमापाधसासानी धपमागारिसारिसा ॥ १ ॥

मायामालवगौलाच्च जगन्मोहनिसंभवः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे रिधवर्ज्यं चाप्यवरोहे धवर्जितम् ।
सगमापानिसासानी पमगारिसनीससा ॥ २ ॥

मायामालवगौलाच्च गौलरागः प्रकीर्तितः ।
निन्यासं न्यंशकं चैव निषादग्रहमुच्यते ।
आरोहेऽप्यवरोहे च धवर्ज्यं वक्रमेव च ।
सरिगामारिमापानी सनिपामागमारिसा ॥ ३ ॥

मायामालवगौलाच्च बौलिरागो भवेत्पुनः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे मनिवर्ज्यं चाप्यवरोहे मवर्जितम् ।
सरिगापाधसासानी सनिधापागरीरिसा ॥ ४ ॥

मायामालवगौलाच्च रागः सारङ्गनाटकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे गनिवर्ज्य च पूर्णवक्रावरोहकम् ।
सरिमापाधसानीसा धपमागारिसानिसा ॥ ५ ॥

मायामालवगौलाच्च नाथरामक्रियः स्मृत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
संपूर्णारोहावरोहो मध्यरागः स कीर्तितः ।
सरिगामपधानीधा पमगारिसरीससा ॥ ६ ॥

मायामालवगौलाच्च मेचबौलिरुदाहृतः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे मनिवर्ज्यं चाप्यवरोहे समग्रकम् ।
सरिगापाधसासानी धपमागारिसारिसा ॥ ७ ॥

मायामालवगौलाच्च गुम्मकाम्भोजिनामकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

मवर्ज्यवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सरिगापाधनीधासा सनिधापामगारिसा ॥ ८ ॥

मायामालवगोलाच्च रेवगुप्तिरितीरितः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च मनिवर्ज्यं तथोडुवम् ।
सरिगापाधसाधासा सधपागारिसारिसा ॥ ९ ॥

मायामालवगोलाच्च रागो मलहरिः स्मृतः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे गनिवर्ज्यं चाप्यवरोहे निवर्जितम् ।
सरिमापाधसासाधा सधपामागरीससा ॥ १० ॥

मालामालवगोलाच्च रागः सालङ्गनाटकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
वक्रारोहं गनीवर्ज्यं पूर्णवक्रावरोहकम् ।
सरीसमपधासाधा सनीसधपमागरी ॥ ११ ॥

मायामालवगोलाच्च जातो मङ्गलकैशिकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
रविर्ज्यवक्रमारोहेऽप्यवरोहे समग्रकम् ।
समगामपमाधानी सनिधापमगारिसा ॥ १२ ॥

मायामालवगौलाच्च जातो ललितपञ्चमः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे तु पवर्ज्य च पूर्णवक्रावरोहकम् ।
सरिगामाधनीसानी धमपामगरीरिसा ॥ १३ ॥

मायामालवगौलाच्च रागो मारुवसंज्ञकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
रिवर्ज्यवक्रमारोहे पूर्णवक्रावरोहकम् ।
सगमापाधनीसानी धपमापामगारिसा ॥ १४ ॥

मायामालवगौलाच्च शुद्धक्रिय उदाहृतः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
वक्रारोहे गनीवर्जमवरोहे निवर्जितम् ।
सरिपामपधाधासा सधपामगरीरिसा ॥ १५ ॥

मायामालवगौलाच्च मेघरञ्जिरुदाहृतः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च पधवर्ज्यं तथौडुवम् ।
सरिगामानिसानीसा सनिमागारिसारिसा ॥ १६

मायामालवगौलाच्च पाडिराग उदाहृतः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

आरोहे गधवर्ज्यं वक्रावरोहे गवर्जितम् ।
सरिमापानिसानीसा सनिपाधापमारिसा ॥ १७ ॥

मायामालवगौलाच्च राग. स्यात्पूर्णपञ्चमः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
निवर्ज्यारोहावरोहं मध्यस्थानसमुद्भवम् ।
सरिगामपधाधाप मगरीसमगारिसा ॥ १८ ॥

मायामालवगौलाच्च सुरसिन्धुरुदीरितः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
रिवर्ज्यवक्रमारोहे पूर्णवक्रावरोहकम् ।
समगामपधानीधा सनिधापमरीगसा ॥ १९ ॥

मायामालवगौलाच्च देश्यगौल उदाहृतः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च गमवर्जितवक्रकम् ।
सरिसापधनीनीसा निधपासरिसारिसा ॥ २० ॥

मायामालवगौलाच्च गौरीराग उदीरितः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे गधवर्ज्यं चाप्यवरोहे समग्रकम् ।
सरिमापानिसासानी धपमागारिसानिसा ॥ २१ ॥

मायामालवगौलात्तु सिन्धुरामक्रियः स्मृतः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहणे रिवर्ज्यं वक्रावरोहे रिवर्जितम् ।
सगमापाधनीधानी सनीपाधपमागसा ॥ २२ ॥

मायामालवगौलाच्च गौलिपन्तुरुदाहृतः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
संपूर्णवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सरिगारिमपाधापा निसनीधपमागरी ॥ २३ ॥

मायामालवगौलाच्च रागः सौराष्ट्रसंज्ञकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च संपूर्णस्वरसंयुतम् ।
सरीगामपधानीसा सनीधापमगारिसा ॥ २४ ॥

मायामालवगौलाच्च रागः स्यादार्द्रदेशिकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहणे तु संपूर्णमवरोहे निवर्जितम् ।
सरिगामपधानीसा सधापमगरीससा ॥ २५ ॥

मायामालवगौलात्तु गूर्जरीराग इष्यते ।
गन्यासं गांशकं चैव गान्धारग्रहमेव च ।

आरोहणे तु संपूर्णं पूर्णवक्रावरोहकम् ।
सरिगामपधानीसा धनिपामगरीससा ॥ २६ ॥

जातः कन्नडबङ्गालो मायामालवगौलकात् ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
निवर्ज्यवक्रमारोहेऽप्यवरोहे निवर्जितम् ।
सरिमागमधापाधा पधसाधपमागरी ॥ २७ ॥

मायामालवगौलाच्च जातोऽसौ मार्गदेशिकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे मनिवर्ज्यं वक्रावरोहे निवर्जितम् ।
सरिगापाधसाधासा सधमापगरीससा ॥ २८ ॥

मायामालगौलाच्च परजूराग ईरितः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च संपूर्णस्वरसंयुतम् ।
सरिगामपधानीसा सनिधापमगारिसा ॥ २९ ॥

मायामालवगौलाच्च पूर्विराग उदीरितः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च संपूर्णस्वरसंयुतम् ।
सरिगामपधानीसा सनिधापमगारिसा ॥ ३० ॥

मायामालवगौलाच्च वसन्तो राग इष्यते ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे रिपवर्ज्यं चाप्यवरोहे पवर्जितम् ।
सगामधनिसानीसा सनिधामगरीससा ॥ ३१ ॥

१६. चक्रवाकाख्यमेलाच्च जाता सा तु कलावती ।
रिन्यासं यंशकं चैव रिषभग्रहमुच्यते ।
आरोहे गनिवर्ज्यं वक्रावरोहे निवर्जितम् ।
सरिमापापधाधासा सधपामागसारिसा ॥ १ ॥

चक्रवाकाख्यमेलाच्च नाम्ना वै वेगवाहिनी ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे पूर्णवक्रं चाप्यवरोहे समग्रकम् ।
सरिगामापधानीधा सनिधापाम्गारिसा ॥ २ ॥

भुजङ्गिनी च संजाता चक्रवाकाख्यमेलतः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
पवर्ज्यवक्रमारोहेऽप्यवरोहे पवर्जितम् ।
सरिसामगमानीधा निसनीधमगारिसा ॥ ३ ॥

१७. सूर्यकान्ताख्यमेलाच्च सुप्रदीप इतीरितः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

आरोहे तु गवर्ज्यं स्यात्पूर्णवक्रावरोहकम् ।
सरिमापधनीर्नीसा निधपामागमारिसा ॥ १ ॥

सूर्यकान्ताख्यमेलाच्च भैरवः समजायत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे तु सुसंपूर्णमवरोहे निवर्जितम् ।
सरिगामपधानीसा सधपामगरीससा ॥ २ ॥

१८. हाटकाम्बरिमेलाच्च संजाता शुद्धमालवी ।
सन्यांसं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च संपूर्णं वक्रमेव च ।
सगरीगामपाधानी धसनीधापमागरी ॥ १ ॥

हाटकाम्बरिमेलाच्च संजातः सिंहलस्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे तु सुसंपूर्णं पूर्णवक्रावरोहकम् ।
सरिगामापधानीसा निधनीपामगारिसा ॥ २ ॥

हाटकाम्बरिमेलाच्च कल्लोलः समजायत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽरिगमं वक्रावरोहे तु रिवर्जितम् ।
सपपाधानिसासानी धनिपामागसानिसा ॥ ३ ॥

१९. झङ्कारध्वनिमेलाच्च झङ्कारभ्रमरी ह्यभूत् ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे पूर्णवक्रं चाप्यवरोहे समग्रकम् ।
सगरीगामपाधानी धसनीधापमागरी ॥ १ ॥

नाम्ना च पूर्णललिता झङ्कारध्वनिमेलतः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
वक्रारोहे धनीवर्ज्यमवरोहे समग्रकम् ।
सरिगारिमपासासा सनिधापमगारिसा ॥ २ ॥

२०. नरभैरविमेलाच्च भैरवीराग इष्यते ।
धन्यासं धांशकं चैव धैवतग्रहमुच्यते ।
पवर्ज्यवक्रमारोहेऽप्यवरोहे पवर्जितम् ।
सरिगामनिधानीसा सनिधामगरीससा ॥ १ ॥

नरभैरविमेलाच्च रीतिगौल उदाहृतः ।
निन्यासं न्यंशकं चैव निषादग्रहमुच्यते ।
आरोहेऽप्यवरोहे च संपूर्णं वक्रमेव हि ।
सगारिगमपानीमा निधमापधमागरी ॥ २ ॥

नरभैरविमेलाच्च जयन्तश्रीरुदाहृता ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

आरोहे रिपवर्ज्यं वक्रावरोहे रिवर्जितम् ।
सग।मधनिसानीसा निधमापमगासनी ॥ ३ ॥

नरभैरवितो नारायणदेशादिरीरितः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे पूर्णवक्रं चाप्यवरोहे समग्रकम् ।
सरीसगमपाधाप निसानिधपमागरी ॥ ४ ॥

नरभैरविमेलाच्च जातो हिन्दोलनामकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ॥
वक्रारोहेऽवरोहे च रिपवर्ज्यं विदुर्बुधाः ।
समगामधनीसासा सनिधामगसानिसा ॥ ५ ॥

नरभैरविमेलाच्च राग आभेरिनामकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे रिधवर्ज्यं चाप्यवरोहे समग्रकम् ।
सगमापानिसासानी धपमागारिसानिसा ॥ ६ ॥

नरभैरवितो जाता ह्युदयरविचन्द्रिका ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च रिधवर्ज्यं तथौडुवम् ।
सगमापानिसानीसा सनिपामागसागसा ॥ ७ ॥

नरभैरविमेलात्तु जाता ह्यानन्दभैरवी ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
संपूर्णवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सगरीगामपाधाप सनिधापमगारिसा ॥ ८ ॥

नरभैरविमेलात्तु देवक्रिय उदाहृतः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
पवर्ज्यवक्रमारोहे पूर्णवक्रावरोहकम् ।
सरिगामनिधानीधा पधमागरिसारिसा ॥ ९ ॥

नरभैरविमेलाद्वा इन्दुघण्टारवोऽजनि ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
रिवर्ज्यवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सगमापधपानीसा निधपामगरीससा ॥ १० ॥

नरभैरविमेलाच्च सा वसन्तवरालिका ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे तु गवर्ज्यं स्यादवरोहे मवर्जितम् ।
सरिमापधनीधानी धपगारिसरीससा ॥ ११ ॥

नरभैरविमेलाच्च नागगान्धारिका मता ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

आरोहेऽप्यरोहे च संपूर्णं मध्यसप्तकम् ।
सरिगामपधाधानी निधापममगारिसा ॥ १२ ॥

नरभैरविमेलाच्च माञ्जीराग उदाहृतः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च संपूर्णमिदमिष्यते ।
सरीगामपधानीसा सनीधापमगारिसा ॥ १३ ॥

नरभैरविमेलाच्च शुद्धदेशी व्यजायत ।
पन्यासं पांशकं चैव पञ्चमग्रहमुच्यते ।
आरोहे तु गवर्ज्यं स्यादवरोहे समग्रकम् ।
सरिमापधनीनीसा सनिधापमगारिसा ॥ १४ ॥

नरभैरविमेलात्तु मार्गहिन्दोल इष्यते ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे तु सुसंपूर्णमवरोहे रिवर्जितम् ।
सरिगामपधानीसा निधपामगसारिसा ॥ १५ ॥

नरभैरविमेलाच्च नायकीराग इष्यते ।
निन्यासं न्यंशकं चैव निषादग्रहमुच्यते ।
गवर्ज्यवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सरिसामपधानीधा पसनीधपमागरी ॥ १६ ॥

कनकाद्यवसन्तश्च नरभैरविमेलजः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
रिवर्ज्यवक्रमारोहे त्ववरोहे समग्रकम् ।
सगमापनिधासानी धपमागरिसानिसा ॥ १७ ॥

नरभैरविमेलात्तु संजातः पूर्णषड्जकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
वक्रारोहेऽरिगनिकमवरोहे रिवर्जितम् ।
सपमापधपासासा सनिधामगरीससा ॥ १८ ॥

गोपिकाद्यवसन्तश्च नरभैरविमेलजः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
वक्रारोहे रिगवर्ज्यमवरोहे रिवर्जितम् ।
समपानिधनीधासा निधपामगसाधसा ॥ १९ ॥

नरभैरविमेलात्तु चापघण्टारवः स्मृतः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे रिधवर्ज्यं चाप्यवरोहे पवर्जितम् ।
सगमामपनीधामा गरिनीसगरीनिसा ॥ २० ॥

स्याद्धिन्दोलवसन्तश्च नरभैरविमेलतः ।
धन्यासं धांशकं चैव धैवतग्रहमुच्यते ।

आरोहेऽप्यवरोहे च रिवर्ज्यं वक्रमेव च ।
सगमापधनीधासा निधपामधमागसा ॥ २१ ॥

सारङ्गकापिरागश्च नरभैरविमेलजः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
वक्रारोहे गधवर्ज्यमवरोहे समग्रकम् ।
सरिपामरिमापानी सनिधापमगारिसा ॥ २२ ॥

नरभैरविमेलात्तु जाता ह्यमृतवाहिनी ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
गान्धारवर्ज्यमारोहेऽप्यवरोहे पवर्जितम् ।
सरीमपधनीसासा सनिधामगरीससा ॥ २३ ॥

नरभैरविमेलात्तु जिङ्ग्लारागः प्रकीर्तितः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
संपूर्णवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सरिगामपधानीधा पसनीधापमागरी ॥ २४ ॥

२१. कारवाणीमेलजाता जयश्रीरिति हि स्मृता ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
संपूर्णवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सरिगामपधानीधा सनिधापमगारिसा ॥ १ ॥

कीरवाणीमेलजाता किरणावलिनामिका ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे तु सुसंपूर्णमवरोहे निवर्जितम् ।
सरिगामपधानीसा सधापमगरीससा ॥ २ ॥

कीरवाणीमेलजाता माधवी परिकीर्तिता ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
रिवर्ज्यवक्रमारोहे पूर्णवक्रावरोहकम् ।
समगामपधानीसा निधपामसमागरी ॥ ३ ॥

कीरवाणीमेलजातः स्यात्कल्याणवसन्तकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
रिपवर्जितमारोहेऽप्यवरोहे समग्रकम् ।
सगमाधनिसासानी धपमागरिसानिसा ॥ ४ ॥

कर्णाटदेवगान्धारी कीरवाणीसमुद्भवा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे तु रिवर्ज्यं चाप्यवरोहे समग्रकम् ।
सगमापमपाधापा मगरीसानिसानिसा ॥ ५ ॥

२२. अधिकारात्खरहरप्रियाच्छ्रीराग इष्यते ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

आरोहे गधवर्ज्यं च पूर्णवक्रावरोहकम् ।
सरिमापनिसानीपा धनीपमरिगारिसा ॥ १ ॥

मालवश्रीः खरहरप्रियमेलादजायत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
रिवर्ज्यवक्रमारोहेऽप्यवरोहे रिवर्जितम् ।
सगमापनिधानीपा निसानिधपमागसा ॥ २ ॥

मेलाज्जातः खरहरप्रियात्कन्नडगौलकः ।
निन्यासं न्यंशकं चैव निषादग्रहमुच्यते ।
आरोहणे धवर्ज्यं चाप्यवरोहे रिवर्जितम् ।
सरिगामपनीनीसा निधपामगसानिसा ॥ ३ ॥

मेलाज्जाता खरहरप्रियाद्वै मध्यमावती ।
मन्यासं मांशकं चैव मध्यमग्रहमुच्यते ।
आरोहेऽप्यवरोहे च गधवर्ज्यं तथौडुवम् ।
सरिमापमपानीसा सनिपामरिसानिसा ॥ ४ ॥

मेलाज्जाता खरहरप्रियाद्वै फलमञ्जरी ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे रिपनीवर्ज्यं पूर्णवक्रावरोहकम् ।
सगगामधाधासा निधपामगमारिसा ॥ ५ ॥

मणिरङ्गुः खरहरप्रियमेलादजायत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
धवर्ज्यवक्रमारोहेऽप्यवरोहे धवर्जितम् ।
सरिमागमपानीसा निपमागरिसानिसा ॥ ६ ॥

रागो जयन्तसेनाख्यो मेलात्खरहरप्रियात् ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे रिनिवर्ज्यं चाप्यवरोहे रिवर्जितम् ।
सगमामपधासासा निधपामगसानिसा ॥ ७ ॥

नाम्ना मेलात्खरहरप्रियाज्जाता तु सैन्धवी ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च मध्यमं पूर्णमेव च ।
निधनीसरिगामापा मगरीसनिधानिसा ॥ ८ ॥

शुद्धधन्यासिरागः स्यान्मेलात्खरहरप्रियात् ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
वक्रारोहे रिधवर्ज्यं रिधवर्ज्यावरोहकम् ।
सगमापनिपासासा सनिपामगसागसा ॥ ९ ॥

शुद्धभैरविरागः स्यान्मेलात्खरहरप्रियात् ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

रिपवर्ज्यारोहवक्रमवरोहे पवर्जितम् ।
सगमामानिधासानी धमगारिसगारिसा ॥ १० ॥

आभोगिनामा रागः स्यान्मेलात्खरहरप्रियात् ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च पनिवर्ज्य तथौडुवम् ।
सरिगामगमाधासा सधमामगरीससा ॥ ११ ॥

मेलाज्जाता खरहरप्रियात्सालगभैरवी ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे गनिवर्ज्यं चाप्यवरोहे समग्रकम् ।
सरिमापधसासानी धपमागरिसाधसा ॥ १२ ॥

जयनारायणीरागो मेलात्खरहरप्रियात् ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे तु निवर्ज्यं स्यादवरोहे समग्रकम् ।
सरिगामपधासानी धपमागरिसाधसा ॥ १३ ॥

मेलाज्जाता खरहरप्रियान्नाम्ना मनोहरी ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
निवर्ज्यवक्रमारोहे त्ववरोहे निवर्जितम् ।
सगरीगामपाधासा धपमागरिसाधसा ॥ १४ ॥

जाता मारुवधन्यासी मेलात्खरहरप्रियात् ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
रिवर्ज्यवक्रमारोहे पूर्णवक्रावरोहकम् ।
सगमापधनीसानी धपमाधमगारिसा ॥ १५ ॥

मेलाज्जातः खरहरप्रियाद्रागः कलानिधिः ।
धन्यासं धांशकं चैव धैवतग्रहमुच्यते ।
संपूर्णवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सरिगामसपामाधा निसनीधपमागरी ॥ १६ ॥

मेलाज्जातः खरहरप्रियाद्रागस्तु पञ्चमः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
गमवर्ज्यारोहवक्रमवरोहे समग्रकम् ।
सरिधाधपनीसानी धपमागरिसानिसा ॥ १७ ।

जातस्तु शुद्धबङ्गालो मेलात्खरहरप्रियात् ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे गनिवर्ज्यं चाप्यवरोहे निवर्जितम् ।
सरिमापाधसाधापा मरिगारिसधाधसा ॥ १८

जातो मेलात्खरहरप्रियाद्रागस्तु मञ्जरी ।
धन्यासं धांशकं चैव धैवतग्रहमुच्यते ।

आरोहे पूर्णवक्रं चाप्यवरोहे समग्रकम् ।
सगरीगमपानीधा निसनीधपमागरी ॥ १९ ॥

उशेनिरागः संजातो रागात्स्वरहरप्रियात् ।
रिन्यासं यंशकं चैव रिषभग्रहमुच्यते ।
आरोहेऽप्यवरोहे च संपूर्णस्वरसप्तकम् ।
सरिगामपधानीसा सनिधापमगारिसा ॥ २० ॥

कापिरागश्च संजातो मेलात्स्वरहरप्रियात् ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
संपूर्णवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सरिगामरिपामाधा धनिधापमगारिसा ॥ २१ ॥

श्रीरञ्जनीरागजनिर्मेलात्स्वरहरप्रियात् ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च पवर्ज्यं षाडवं तथा ।
सरिगामधनीसासा सनिधामगरीससा ॥ २२ ॥

शुद्धवेलावली जाता मेलात्स्वरहरप्रियात् ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे गधवर्ज्यं च पूर्णवक्रावरोहकम् ।
सरिमापनिसानीधा निपमागरिसानिसा ॥ २३ ॥

दर्बारुरागः संजातो मेलात्खरहरप्रियात् ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहणे गवर्ज्यं चाप्यवरोहे समग्रकम् ।
सरिमापधनीसासा निधपामगगारिसा ॥ २४ ॥

मन्दमारी च संभूता मेलात्खरहरप्रियात् ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे गनिवर्ज्यं च पूर्णवक्रावरोहकम् ।
सरिमापधसासानी सधपामरिगासमा ॥ २५ ॥

सिद्धसेना च संभूता मेलात्खरहरप्रियात् ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
निवर्ज्यवक्रमारोहे पूर्णवक्रावरोहकम् ।
सगरीगमपाधासा निधमापमरीगरी ॥ २६ ॥

मल्लारुरागः संजातो मेलात्खरहरप्रियात् ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
निवर्ज्यवक्रमारोहे गनिवर्ज्यावरोहकम् ।
सरिमागमपाधासा धसधापमरीसरी ॥ २७ ॥

मुखारिरागः संजातो मेलात्खरहरप्रियात् ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

गवर्ज्यवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सरिमापधनीधासा निधपामगरीसरी ॥ २८ ॥

जाता मेलात्खरहरप्रियाद्देवमनोहरी ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहणे गवर्ज्यं वक्रावरोहे गवर्जितम् ।
सरिमापधनीसासा निधनीपमरीससा ॥ २९ ॥

बालघोषी च संजाता मेलात्खरहरप्रियात् ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
संपूर्णवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सरिगापमनीधासा सनिधापमगारिसा ॥ ३० ॥

२३. गौरीमनोहरीमेलाज्जाता वेलावलीति या ।
धन्यासं धांशकं चैव धैवतग्रहमुच्यते ।
आरोहे गनिवर्ज्यं चाप्यवरोहे समग्रकम् ।
सरिमापधसासानी धपमागरिसारिसा ॥ १ ॥

२४. वरुणप्रियमेलाच्च जातो वीरवसन्तकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
वक्रारोहे धनीवर्ज्यमवरोहे समग्रकम् ।
सगारिमपसापासा सनिधापमगारिसा ॥ १ ॥

२५. माररञ्जनिमेलाच्च शरद्द्युतिरजायत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
संपूर्णवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सरिगामपधानीधा सनिधापमगारिसा ॥ १ ॥

माररञ्जनिमेलाच्च जाता देशमुखारिका ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च संपूर्णं वक्रमेव च ।
सरिगामपधानीधा सधनीधपमागरी ॥ २ ॥

माररञ्जनिमेलाच्च केसरी राग इष्यते ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
निवर्ज्यवक्रमारोहे पूर्णवक्रावरोहकम् ।
समगामरिगामापा धसधानिधपामगा ॥ ३ ॥

२६. चारुकेश्यभिधान्मेलान्नाम्ना जाता तरङ्गिणी ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
संपूर्णवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सरिमागरिमापाधा सनिधापमगारिसा ॥ १ ॥

२७. सरसाङ्गीमेलजाता सुरसेनेति कीर्तिता ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

आरोहे गनिवर्ज्यं चाप्यवरोहे समग्रकम् ।
सरिमामपधासानी धपमामगरीरिसा ॥ १ ॥

सरसाङ्गीमेलजातो दिव्यपञ्चमनामकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च संपूर्णस्वरसप्तकम् ।
सरिगामपधानीसा सनिधापमगारिसा ॥ २ ॥

सरसाङ्गीमेलजाता कमलाद्या मनोहरी ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
रिधवर्जितमारोहेऽप्यवरोहे रिवर्जितम् ।
सगमामपनीनीसा सनिधापमगाससा ॥ ३ ॥

२८. हरिकाम्भोजिमेलाच्च काम्भोजीराग इष्यते ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे तु निवर्ज्यं चाप्यवरोहे समग्रकम् ।
सरिगामपधाधासा सनिधापमगारिसा ॥ १ ॥

हरिकाम्भोजिमेलाच्च रागः केदारगौलकः ।
निन्यासं न्यंशकं चैव निषादग्रहमुच्यते ।
आरोहे गधवर्ज्यं चाप्यवरोहे समग्रकम् ।
सरिमापनिसासानी धपमागरिसारिसा ॥ २ ॥

हरिकाम्भोजिमेलाच्च जाता नारायणी तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे गनिवर्ज्यं चाप्यवरोहे गवर्जितम् ।
सरिमापधसासानी धपमारिसनीधसा ॥ ३ ॥

यो नारायणगौलः स हरिकाम्भोजिमेलजः ।
निन्यासं न्यंशकं चैव निषादग्रहमुच्यते ।
गवर्ज्यवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सरिमापधनीधानी सनीधापमगारिसा ॥ ४ ॥

हरिकाम्भोजिमेलाच्च मालवीराग इष्यते ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च संपूर्णं वक्रमेव च ।
सरिगामपनीमाधा निधनीपमगामरी ॥ ५ ॥

हरिकाम्भोजिमेलाच्च जाता च्छायातरङ्गिणी ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
धवर्ज्यवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सरिमागमपानीसा सनिधापमगारिसा ॥ ६ ॥

हरिकाम्भोजिमेलाच्च बलहंसः प्रकीर्तित. ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

आरोहे गनिवर्ज्यं च पूर्णवक्रावरोहकम् ।
सरिमापधसानीधा पमरीमगसारिसा ॥ ७ ॥

हरिकाम्भोजिमेलाच्च नटनारायणी मता ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
पवर्ज्यवक्रमारोहे वक्रपूर्णावरोहकम् ।
सरिगामधनीधासा निधपामगमारिसा ॥ ८ ॥

हरिकाम्भोजिमेलाच्च जातो मोहननामकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च मनिवर्ज्यं तथौडुवम् ।
सरिगापधसाधासा सधपागरिसाधसा ॥ ९ ॥

हरिकाम्भोजिमेलाच्च कापिनारायणी मता ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
गान्धारवर्ज्यमारोहेऽप्यवरोहे समग्रकम् ।
सरिमापधनीसानी धपमागरिसारिसा ॥ १० ॥

हरिकाम्भोजिमेलाच्च जञ्झूटीराग इष्यते ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
निषादवर्ज्यमारोहेऽप्यवरोहे समग्रकम् ।
धसरीगमपाधानी धपमागरिसाधसा ॥ ११ ॥

हरिकाम्भोजिमेलाच्च शहनाराग इष्यते ।
निन्यासं न्यंशकं चैव निषादग्रहमुच्यते ।
आरोहेऽप्यवरोहे च संपूर्णं वक्रमेव च ।
सरिगामपमाधानी सनीधपमगामरी ॥ १२ ॥

हरिकाम्भोजिमेलाच्च जाता हीशमनोहरी ।
रिन्यासं यंशकं चैव रिषभग्रहमुच्यते ।
आरोहणे सुसंपूर्णं पूर्णवक्रावरोहकम् ।
सरिगामपधानीसा निधपामरिमागरी ॥ १३ ॥

हरिकाम्भोजिमेलाच्च स्यात्प्रतापवरालिका ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे गधनीवर्ज्यमवरोहे निर्वर्जितम् ।
सरिमापसधापामा गरिसाधपसारिसा ॥ १४ ॥

हरिकाम्भोजिमेलाच्च स्यात्कुन्तलवरालिका ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
वक्रारोहेऽवरोहे च रिगवर्ज्यं तथौडुवम् ।
समपाधनिधासासा निधपाममसाधसा ॥ १५ ॥

हरिकाम्भोजिमेलाच्च सरस्वतिमनोहरी ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

आरोहे पनिवर्ज्यं च पूर्णवक्रावरोहकम् ।
सरिगामधसाधानी पमगारिसरीससा ॥ १६ ॥

हरिकाम्भोजिमेलाच्च नाम्ना नीलाम्बरी मता ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
पूर्णवक्रारोहकं धवर्ज्यवक्रावरोहकम् ।
सरिगामपधापानी सनिपामगरीगसा ॥ १७ ॥

हरिकाम्भोजिमेलाच्च सामरागः प्रकीर्तितः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे गनिवर्ज्यं चाप्यवरोहे निवर्जितम् ।
सरिमामपधासासा धपमागरिसारिसा ॥ १८ ॥

हरिकाम्भोजिमेलात्स्यादान्धालीरागसंभवः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे गधवर्ज्यं वक्रावरोहे धवर्जितम् ।
सरिमापनिसानीपा मरिगामरिसानिसा ॥ १९ ॥

हरिकाम्भोजिमेलाच्च द्विजावन्त्यपि संमता ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
संपूर्णवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सरीमागमपाधानी सनीधपमगारिसा ॥ २० ॥

हरिकाम्भोजिमेलात्तु संजातो मत्तकोकिलः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च वक्रं च गमवर्जितम् ।
सरिधाधपनीनीधा धपसारीसनीसरी ॥ २१ ॥

हरिकाम्भोजिमेलाच्च रागो बङ्गालनामकः ।
गन्यासं गांशकं चैव गान्धारग्रहमेव ज ।
वक्रारोहेऽधनि च वक्रावरोहे धवर्जितम् ।
सरीगामपमारीपा सनिपामरिगारिसा ॥ २२ ॥

हरिकाम्भोजिमेलाच्च रागपञ्जरनामकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
वक्रारोहे गवर्ज्यं च गपवर्ज्यावरोहकम् ।
सरिमापधनीधासा सनिधामरिसाधसा ॥ २३ ॥

हरिकाम्भोजिमेलाच्च संजाता रविचन्द्रिका ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
पवर्ज्यवक्रमारोहेऽप्यवरोहे पवर्जितम् ।
सरिगामधनीधासा सनिधामगरीससा ॥ २४ ॥

हरिकाम्भोजिमेलाच्च संजातः कोकिलध्वनिः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

पवर्ज्यवक्रमारोहे पूर्णवक्रावरोहकम् ।
सरिगामधनीधासा निधनीपमगारिसा ॥ २५ ॥

नवरसकन्नडः स्याद्धरिकाम्भोजिमेलजः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे रिधनीवर्ज्यमवरोहे पवर्जितम् ।
सगमामपसानीधा धममागरिसारिसा ॥ २६ ॥

हरिकाम्भोजिमेलाच्च स्वरावलिरुदाहृता ।
सन्यास सांशकं चैव सषड्जग्रहमुच्यते ।
रिवर्ज्यवक्रमारोहे पूर्णवक्रावरोहकम् ।
समगामपनीधानी सनिपाधमगारिसा ॥ २७ ॥

हरिकाम्भोजिमेलाच्च जाता नागस्वरावलिः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च रिनिवर्ज्य तथौडुवम् ।
सगगाममपाधासा सधपामगसाधसा ॥ २८ ॥

हरिकाम्भोजिमेलाच्च बहुदारी ह्यजायत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
रिवर्ज्यवक्रमारोहे पूर्णवक्रावरोहकम् ।
सगमाधपधानीसा सनिपामगसानिसा ॥ २९ ॥

हरिकाम्भोजितो यदुकुलकाम्भोजिसंभवः ।
धन्यासं धांशकं चैव धैवतग्रहमुच्यते ।
आरोहे गनिवर्ज्यं चाप्यवरोहे समग्रकम् ।
सरिमामपधाधासा सनीधापमगारिसा ॥ ३० ॥

हरिकाम्भोजिमेलाच्च सुरटी राग इष्यते ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे गधवर्ज्यं चाप्यवरोहे समग्रकम् ।
सरिरीमपनीनीसा सनिधापमगारिसा ॥ ३१ ॥

हरिकाम्भोजिमेलाच्च कमासूरागसंभवः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
क्वचिद्रिमिश्रमारोहेऽप्यवरोहे रिवर्जितम् ।
समगामपधानीसा रिसानिधपमागसा ॥ ३२ ॥

हरिकाम्भोजिमेलाच्च जाता नाटकुरञ्जिका ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे तु पवर्ज्यं चावरोहेऽपि रिवर्जितम् ।
सरिगामधनीसासा सनिधापमगारिसा ॥ ३३ ॥

२९. कुरञ्जी जनिता धीरशंकराभरणात्किल ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

आरोहेऽप्यवरोहे च पूर्णमध्यमसप्तकम् ।
सनिनीसरिगामापा धपमागरिसानिसा ॥ १ ॥

केदारसंभवो धीरशंकराभरणात्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
वक्रारोहे रिधवर्ज्यं वक्रपूर्णावरोहकम् ।
समगामपनीसानी पमगामधमागरी ॥ २ ॥

आहिरीनाटको धीरशंकराभरणात्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च रिवर्ज्यं वक्रमेव च ।
समगामपधानीसा निपधानिपगामगा ॥ ३ ॥

माहुरी जनिता धीरशंकराभरणात्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
धवर्ज्यवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सरिगारिमपानीनी धपमागरिसासरी ॥ ४ ॥

जातः कोलाहलो धीरशंकराभरणात्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
रिवर्ज्यवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सपमागमपाधानी सनिधापमगारिसा ॥ ५ ॥

जनरञ्जनिका धीरशंकराभरणात्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
संपूर्णवक्रमारोहे गनिवर्ज्यावरोहकम् ।
सरिगामपधापानी ससधापमरीरिसा ॥ ६ ॥

ब्यागुरागजनिर्धीरशंकराभरणात्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
रिवर्ज्यवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सगामपनिधानीसा सनिधापमगारिसा ॥ ७ ॥

हंसध्वनिजनिर्धीरशंकराभरणात्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च मधवर्ज्यं तथौडुवम् ।
सरिगापपनीसासा निपगागरिरीससा ॥ ८ ॥

स्यात्पूर्णचन्द्रिका धीरशंकराभरणात्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
निवर्ज्यवक्रमारोहे पूर्णवक्रावरोहकम् ।
सरिगामपधापासा निपधापमगामरी ॥ ९ ॥

देवगान्धारिका धीरशंकराभरणात्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

संपूर्णवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सरिगारिमपाधानी सनिधापमगारिसा ॥ १० ॥

आरभी जनिता धीरशंकराभरणात्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे गनिवर्ज्य चाप्यवरोहे समग्रकम् ।
सरिमापधसासानी धपमागरिसानिसा ॥ ११ ॥

नवरोज्वाह्वयो धीरशंकराभरणात्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च संपूर्णं मध्यमं तथा ।
पधनीसरिगामापा पमगारिसनीधपा ॥ १२ ॥

अठाणरागोऽभूद्धीरशंकराभरणात्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
गधवर्जितमारोहेऽप्यवरोहे समग्रकम् ।
सरिमापपनीसासा निधापमगगारिसा ॥ १३ ॥

जुलावुरागः स्याद्धीरशंकराभरणात्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च धवर्ज्यं मध्यमेव च ।
पनिसारिरिगामापा मगरीसनिपानिसा ॥ १४ ॥

कन्नडो जनितो धीरशंकराभरणात्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च संपूर्णं वक्रमेव च ।
सरिगामपमाधार्नी सधापमपगामरी ॥ १५ ॥

रागो बिलहरिर्धीरशंकराभरणात्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे मनिवर्ज्यं चाप्यवरोहे समग्रकम् ।
सरिगापधसासानी धपमागरिसाधसा ॥ १६ ॥

शुद्धसावेरिका धीरशंकराभरणात्तथा ।
सन्यासं सांशकं चैव सषड्ग्रहमुच्यते ।
आरोहेऽप्यवरोहे च गनिवर्ज्यं तथौडुवम् ।
सरिमापधसाधासा सधपामरिसाधसा ॥ १७ ॥

जातो नागध्वनिर्धीरशंकराभरणात्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे पूर्णवक्रं वक्रावरोहे रिवर्जितम् ।
सरीसमगमापानी सनीधनिपमागसा ॥ १८ ॥

शुद्धो वसन्तश्च धीरशंकराभरणात्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

आरोहे तु धवर्ज्यं च पूर्णवक्रावरोहकम् ।
सरिगामपनीसाधा निपमारिगमागरी ॥ १९ ॥

बेगडो जनितो धीरशंकराभरणात्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे पूर्णवक्रं चाप्यवरोहे समग्रकम् ।
सगरीगमपाधापा सनिधापमगारिसा ॥ २० ॥

जाता च वर्धनी धीरशंकराभरणात्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे गधनीवर्ज्यमवरोहे समग्रकम् ।
सरीरिममपापासा सनिधापमगारिसा ॥ २१ ॥

रागः सिन्ध्वभिधो धीरशंकराभरणात्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
वक्रारोहे धनिवर्ज्यं वक्रपूर्णावरोहकम् ।
सरिगारिमपासानी धपनीधमगारिसा ॥ २२ ॥

स्यात्पूर्वगौलको धीरशंकराभरणात्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
संपूर्णवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सरिमागरिमापाधा निसानिधपमागरी ॥ २३ ॥

गौडमल्लारुश्च धीरशंकराभरणात्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमेव च ।
गनिवर्जितमारोहेऽप्यवरोहे पवर्जितम् ।
सरिमामपधाधासा सनिधाममगारिसा ॥ २४ ॥

३०. नागानन्दिनिमेलात्तु जातः सामन्तरागकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च संपूर्णं वक्रमेव च ।
सरिसामगमापाधा निसनीधनिपामगा ॥ १ ॥

३१. जातो यागप्रियामेलात्कलहंस इतीरितः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
गवर्ज्यं वक्रमारोहेऽप्यवरोहे गवर्जितम् ।
सरीमपधनीधासा सनीधपमरीरिसा ॥ १ ॥

३२. रागवर्धनिमेलाच्च रागचूडामणिर्मता ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यने ।
आरोहे धनिवर्ज्यं वक्रावरोहे पवर्जितम् ।
सरिगामामपासासा निधमारिगसागसा ॥ १ ॥

३३. गाङ्गेयभूषणीमेलाज्जाता गङ्गातरङ्गिणी ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

आरोहे धनिवर्ज्यं वक्रावरोहे समग्रकम् ।
सरिगामपसानीधा पमगाममरीरिसा ॥ १ ॥

३४. वागधीश्वरिमेलाच्च च्छायानाटः प्रकीर्तितः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे धनिवर्ज्य वक्रावरोहे गवर्जितम् ।
सरिगामपमापासा सनिधानिपमारिसा ॥ १ ॥

वागधीश्वरिमेलाच्च संजाता भानुमञ्जरी ।
सन्यासं सांशकं चैव सषड्जग्रहमेव च ।
आरोहणे धवर्ज्यं वक्रावरोहे धवर्जितम् ।
सरिगामपनीनीसा सनिपामरिगारिसा ॥ २ ॥

वागधीश्वरिमेलाच्च शारदाभरणं तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
वक्रारोहे रिवर्ज्यं वक्रावरोहे गवर्जितम् ।
समगामपमाधानी सनिधामपमारिसा ॥ ३ ॥

हरिकाम्भोजिमेलाच्च देशाक्षी समजायत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे मनिवर्ज्यं च पूर्णवक्रावरोहकम् ।
सरिगागपधासासा निधपामगमारिसा ॥ ३४ ॥

३५. शूलिनीनामकान्मेलात्संजातो गानवारिधिः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे पूर्णवक्रं वक्रावरोहे गवर्जितम् ।
समरीगमपाधानी ससधानिपमारिसा ॥ १ ॥

३६. चलनाटाह्वयान्मेलान्नाटरागः समीरितः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहणे तु संपूर्णं गधवर्ज्यावरोहकम् ।
सरिगामपधानीसा सनिपाममरीरिसा ॥ १ ॥

३७. मेलात्तु सालगाभिख्याज्जातः सालविनामकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे पूर्णवक्रं चाप्यवरोहे समग्रकम् ।
सगरीगमपाधानी धसनीधपमागरी ॥ १ ॥

मेलात्तु सालगाभिख्याद्भोगसावेरिनामिका ।
पन्यासं पांशकं चैव पञ्चमग्रहमुच्यते ।
आरोहे तु गवर्ज्यं चाप्यवरोहे समग्रकम् ।
सरिमापधनीधापा मगरीसरिमागरी ॥ २ ॥

३८. जलार्णवाख्यमेलाच्च जगन्मोहननामकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

गवर्ज्यवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सरिमापधसानीसा सनिधापमगारिसा ॥ १ ॥

३९. झालवरालिमेलाच्च जातः कोकिलपञ्चमः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च मवर्ज्यं मध्यसप्तकम् ।
पधनीसरिगारीसा निधापगरिसारिसा ॥ १ ॥

झालवरालिमेलाच्च जातो भूपालपञ्चमः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
वक्रारोहे निवर्ज्यं वक्रावरोहेऽगनि स्मृतम् ।
सगरीगपमाधासा पधमासरिसागरी ॥ २ ॥

४०. नवनीताह्वयान्मेलान्नभोमणिरजायत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
वक्रारोहे धनिवर्ज्यमवरोहे समग्रकम् ।
सरिगारिमपासासा सनिधापमगारिसा ॥ १ ॥

४१. पावनीमेलसंभूतो रागो नाम्ना प्रभावलिः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहणे गवर्ज्यं च पूर्णवक्रावरोहकम् ।
सरिमापधनीसासा निधमापमरीगरी ॥ १ ॥

पावनीमेलसंभूतश्चन्द्रज्योतिरितीरितः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च निवर्ज्य षाडवं तथा ।
सरिगामपधासासा धपमागरिसारिसा ॥ २ ॥

४२. रघुप्रियाह्वयान्मेलाद्रघुलील इति श्रुतः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
धवर्ज्यवक्रमारोहे पूर्णवक्रावरोहकम् ।
समरीपमगामापा निसाधनिपमारिगा ॥ १ ॥

रघुप्रियाह्वयान्मेलाज्जातो गन्धर्वनामकः ।
पन्यासं पांशकं चैव पञ्चमग्रहमुच्यते ।
आरोहेऽप्यवरोहे च पूर्णवक्रं च मध्यकम् ।
मपधाधनिसासारी गगरीरिससानिपा ॥ २ ॥

रघुप्रियाह्वयान्मेलाद्गोपती राग इष्यते ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे पूर्णमथ वक्रावरोहे धवर्जितम् ।
सरिगामपधाधानी पमरीगरिसारिसा ॥ ३ ॥

४३. गवाम्भोध्यभिधान्मेलाद्गीर्वाणी समजायत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

आरोहे पूर्णवक्रं चाप्यवरोहे समग्रकम् ।
सरिगारिमगामाधा निपनीधसनीधपा ॥ १ ॥

गवाम्भोध्याह्वयान्मेलाज्जातः कलिवसन्तकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे तु रिवर्ज्यं च रिधवर्ज्यावरोहकम् ।
सगमापधनीनीसा सनिपापमगाससा ॥ २ ॥

४४. भवप्रियाख्यान्मेलाच्च भवानी समजायत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च पवर्ज्यं षाडवं तथा ।
सरीगामधनीसानी धधमागगरीरिसा ॥ १ ॥

भवप्रियाख्यान्मेलाच्च सरसीरुहसंभवः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
पवर्ज्यवक्रमारोहेऽप्यवरोहे पवर्जितम् ।
सरिगामधनीधासा सनिधामगरीरिसा ॥ २ ॥

४५ शुभपन्तुवरालेश्च जाता पन्तुवरालिका ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च संपूर्णस्वरसप्तकम् ।
सरीगामपधानीसा सनिधापमगारिसा ॥ १ ॥

४६. मेलात्षड्विधमार्गण्या जाता वै तीव्रवाहिनी ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च संपूर्णं वक्रमेव च ।
सरिगामपधापानी सनिधापमगारिगा ॥ १ ॥

मेलात्षड्विधमार्गण्याः श्रीकण्ठी समजायत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च रिवर्ज्यं षाडवं तथा ।
सगामपधनीसासा निधापमगसानिसा ॥ २ ॥

४७. सुवर्णाङ्गीमेलजातः सौवीरो राग एव च ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च संपूर्णं वक्रमेव च ।
सरिगारिमपाधानी सनिपाधपमागरी ॥ १ ॥

सुवर्णाङ्गीमेलजातो रागः स्याद्रतिकाह्वयः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
संपूर्णवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सगरीगमपाधानी सनिधापमगारिसा ॥ २ ॥

सुवर्णाङ्गीमेलजात आभीरूराग इष्यते ।
सन्यासं सांशकं चैव सषड्जग्रहमेव च ।

आरोहेऽप्यवरोहे च रिवर्ज्यं वक्रमेव च ।
निधनीसगमापाधा धपमागगसानिसा ॥ ३ ॥

४८. दिव्यमण्याह्वयान्मेलाद्रागो जीवन्तिनीति यः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे रिगवर्ज्यं चावरोहे रिधवर्जितम् ।
सममापधनीसासा सनिपामगसानिसा ॥ १ ॥

दिव्यमण्याह्वयान्मेलाच्छुद्धगान्धारिका मता ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे गधवर्ज्यं वक्रावरोहे गवर्जितम् ।
सरिसामनिसासानी धनिसानिपमारिसा ॥ २ ॥

दिव्यमण्याह्वयान्मेलादाम्रपञ्चम इष्यते ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे च पवर्ज्यं स्यात्तथा वक्रावरोहके ।
सरिगामधनीसासा सनिधामगसारिसा ॥ ३ ॥

दिव्यमण्याह्वयान्मेलादादिपञ्चमनामकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे गमवर्ज्यं च पूर्णवक्रावरोहकम् ।
सरिपापधनीसासा निधनीपमगारिसा ॥ ४ ॥

४९. धवलाम्बरिमेलाच्च धवलाङ्गी ह्यजायत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
रिवर्ज्यवक्रमारोहेऽप्यवरोहे समग्रकम् ।
समगामपधानीसा सनिधापमगारिसा ॥ १ ॥

धवलाम्बरिमेलाच्च भिन्नहेरालिसंभवः ।
पन्यासं पांशकं चैव पञ्चमग्रहमुच्यते ।
वक्रारोहे रिगवर्ज्यमवरोहे रिवर्जितम् ।
समपाधानिधासानी धपमामागसानिसा ॥ २ ॥

धवलाम्बरिमेलाच्च जातो देवगिरिस्तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे गनिवर्ज्यं च पूर्णवक्रावरोहकम् ।
सरिमापधसासानी निधपामगरीगसा ॥ ३ ॥

धवलाम्बरिमेलाच्च भम्माणी समजायत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च पवर्ज्यं षाडवं तथा ।
सरिगामाधनीसानी सनिधामागरीरिसा ॥ ४ ॥

५०. नामनारायणीमेलान्नर्मदाराग इष्यते ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

आरोहे तु पवर्ज्य च पूर्णवक्रावरोहकम् ।
सरिगामधनीसासा निधमापमगारिसा ॥ १ ॥

नामनारायणीमेलान्मन्दारी समजायत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च धवर्ज्यं षाडवं तथा ।
सरिगामापनीनीसा सनिपामागरीरिसा ॥ २ ॥

नामनारायणीमेलात्प्रतापो राग इष्यते ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे तु रिवर्ज्यं वक्रावरोहे गवर्जितम् ।
सगमापधनीसानी निधपाममसारिसा ॥ ३ ॥

५१. कामवर्धनिमेलाच्च रामक्रिय उदाहृतः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च संपूर्णस्वरसप्तकम् ।
सरिगामपधानीसा सनिधापमगारिसा ॥ १ ॥

कामवर्धनिमेलाच्च दीपको राग इष्यते ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
वक्रारोहेऽरिनि च वक्रावरोहे समग्रकम् ।
सगमापधपासासा निधनीपमगारिसा ॥ २ ॥

कामवर्धनिमेलाच्च जातो भोगवसन्तकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च पवर्ज्यं षाडवं तथा ।
सरिगामधधानीसा सनिधामगरीरिसा ॥ ३ ॥

५२. रामप्रियाख्यमेलाच्च जाता राममनोहरी ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
संपूर्णवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सरिगामपधानीधा सनिधापमगारिसा ॥ १ ॥

५३. गमनश्रममेलाच्च गमकक्रियसंभवः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे तु गवर्ज्यं च पूर्णवक्रावरोहकम् ।
सरिमापधनीसानी धपमागमरीरिसा ॥ १ ॥

जाता तु पूर्वकल्याणी गमनश्रममेलतः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
संपूर्णवक्रमारोहेऽप्यवरोहे समग्रकम् ।
सरिगामपधानीधा सनिधापमगारिसा ॥ २ ॥

५४. विश्वंभर्याख्यमेलाच्च वैशाखः समजायत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

आरोहणे समग्रं च पूर्णवक्रावरोहकम् ।
सरिगामपधानीसा निधनीपमगामरी ॥ १ ॥

५५. शामलाङ्गीमेलजातो रागः शामलनामकः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे पूर्णवक्रं चाप्यवरोहे समग्रकम् ।
सगरीगमपाधानी धसनीधपमागरी ॥ १ ॥

शामलाङ्गीमेलजातो रागो देशावलिः स्मृतः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
पवर्ज्यवक्रमारोहेऽप्यवरोहे पवर्जितम् ।
सरिगामधनीधासा सनिधामागरीरिसा ॥ २ ॥

५६. षण्मुखप्रियमेलाच्च त्रिमूर्तिः समजायत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च पवर्ज्यं षाडवं तथा ।
सरिगामाधधानीसा सनिधामगरीरिसा ॥ १ ॥

षण्मुखप्रियमेलाच्च नाम्ना वसुकरी स्मृता ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहणे रिवर्ज्यं च रिपवर्ज्यावरोहकम् ।
सगमामापधानीसा सनिधामागसानिसा ॥ २ ॥

षण्मुखप्रियमेलाच्च संजाता भाषिणी तथा ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे पूर्णवक्रं चाप्यवरोहे समग्रकम् ।
सगरीगमपाधानी सनिधापमगारिसा ॥ ३ ॥

षण्मुखप्रियमेलाच्च गरिगद्य इति स्मृतः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहणे रिवर्ज्यं चाप्यवरोहे समग्रकम् ।
निसगामपधाधानी धपमागरिसानिसा ॥ ४ ॥

५७. सिंहेन्द्रमध्यमान्मेलात्सीमन्ती समजायत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहणे सुसंपूर्णं धनिवर्ज्यावरोहकम् ।
सरिगामपधानीसा सपमागारिगारिसा ॥ १ ॥

सिंहेन्द्रमध्यमान्मेलात्सा माधवमनोहरी ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च संपूर्णं वक्रमेव च ।
सगरीगमपानीधा निसनीधमगारिसा ॥ २ ॥

सिंहेन्द्रमध्यमान्मेलाच्छेषनादोऽप्यजायत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

आरोहणे निवर्ज्यं चाप्यवरोहे समग्रकम् ।
सरिगामपधासानी धपमागरिसाधसा ॥ ३ ॥

सिंहेन्द्रमध्यमान्मेलाद्धोट्टाणः समजायत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहेऽप्यवरोहे च पवर्ज्यं षाडवं तथा ।
सरिगामधनीनीसा सनिधामगरीरिसा ॥ ४ ॥

सिंहेन्द्रमध्यमान्मेलात्सर्वाङ्गीराग इष्यते ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे गपवर्ज्यं वक्रावरोहे पवर्जितम् ।
सरिमाधनिसासानी निधमागसरीरिसा ॥ ५ ॥

सिंहेन्द्रमध्यमान्मेलाच्छुद्धरागोऽप्यजायत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहणे धवर्ज्यं वक्रावरोहे धवर्जितम् ।
सरिगामपनीसानी पमगासरिरीससा ॥ ६ ॥

५८. हैमवत्याख्यमेलात्तु रागः सिंहरवोऽभवत् ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे गधवर्ज्यं वक्रावरोहे धवर्जितम् ।
सरिमापनिसासानी निपमारिगरीससा ॥ १ ॥

५९. धर्मवत्याख्यमेलात्तु धौम्यरागः प्रकीर्तितः ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहणे निवर्ज्यं चाप्यवरोहे समग्रकम् ।
सरिगामपधाधासा सनिधापमगारिसा ॥ १ ॥

धर्मवत्याख्यमेलाच्च रञ्जनी समजायत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे पनिवर्ज्यं वक्रावरोहं पवर्जितम् ।
सरिरीगगमाधासा सनिधामगसारिसा ॥ २ ॥

६०. नीतिमत्याख्यमेलात्तु निषधः समजायत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहे धनिवर्ज्यं वक्रावरोहे समग्रकम् ।
सगरीमपसानीधा मपनीपमगारिसा ॥ १ ॥

नीतिमत्याख्यमेलात्तु हंसनादोऽप्यजायत ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।
आरोहणे गवर्ज्यं च तथा वक्रावरोहणे ।
सरिमापधनीसानी निधनीपमरीससा ॥ २ ॥

नीतिमत्याख्यमेलात्तु नाम्ना गौरिक्रिया मता ।
सन्यासं सांशकं चैव सषड्जग्रहमुच्यते ।

आरोहणे रिवर्ज्यं च तथा वक्रावरोहणे ।
सगमापधनीसानी धनिपामगसानिसा ॥ ३ ॥

नीतिमत्याख्यमेलात्तु रागः कैकवशी तथा ।
